# काङ्क्षे वीक्षितुमाशु



भारतीयज्ञानप्रणालीमधिकृत्य केवलं संस्कृतज्ञाः परस्परं चर्चयन्ति चेत्तर्हि सा चर्चा सर्वदा लाभकरी न स्यात्। अस्माभिः समाजे आधुनिकविश्व-विद्यालयेषु च तत्रत्यानाम् अपेक्ष्यानुगुणं (भारतीय-ज्ञानपरम्परामधिकृत्य) वक्तव्यम्। IIT IIM इत्याद्यासु उच्चशिक्षासंस्थासु भारतीयगणितीय-प्रतिमानानि तदितराणि सुखबोधशैल्या उपस्थापनीयानि। संस्कृतज्ञानां वैदुष्यं केवलं संस्कृतज्ञानां निमित्तमिति न स्यात्।

अधुना वयं भारतप्रत्यययुगे वर्तामहे। अतः संस्कृतस्य महत्त्वं संस्कृतस्य प्रासङ्गिकतां चाधिकृत्य नैव भाषणीयम्। सर्वे संस्कृतस्य महत्त्वं प्रासङ्गिकतां च विजानन्ति। कथं दशसु मासेषु संस्कृताध्ययनं सम्भवति? का पद्धतिः अवलम्बनीया? इत्याद्याः आधुनिकानां जिज्ञासाः। अतः तेषां पुरतः संस्कृतस्य महिमवर्णनं सुतरां नैव कर्तव्यम्। सर्वविज्ञातस्य आवृत्त्या चर्वितचर्वणमेव भवति। अतः एषा प्रवृत्तिः त्याज्या।

अस्माकं पूर्वजाः रसायनविज्ञान-भौतविज्ञान-प्राणिविज्ञानदीन् विषयान् संस्कृतेन सविस्तरं व्यलिखन्। एतेषु विषयेषु किं वयम् आधुनिकान् आधुनिकभाषायां प्रबोधयितुं शक्नुमः? चिन्त्यमिदमधुना। भारतीयज्ञानपरम्परायाः स्रोतांसि संस्कृतवाङ्मये सन्निहितानीति अवगमयितुं समर्थान् तरुणसंस्कृतज्ञान् **काङ्क्षे वीक्षितुमाशु**।



**ओलम्पियाड् - प्रचारपत्रकस्य लोकार्पणम्**



यानि शास्त्राणि प्रयोगपथे नैव सन्ति तानि कालकवलितानीति गण्यन्ते। यद्गृहे सहोदरी एव नास्ति तद्गृहे सहोदरीत्यस्य पदस्य प्रयोगः क्रमशः न भविष्यति। (न्यूनमात्रेण क्वचित् भवेत्) तत्सम्बद्धसम्बन्धवाचकशब्दाः अपि क्रमशः श्रुतिपथात् च्युताः भवन्ति। एतादृशी एव शास्त्रकथा। बहूनि शास्त्राणि एवमेव नष्टानि। प्रयोगाभाव एवात्र हेतुः।

अधुना मया भारतीयज्ञानपरम्परायाः सुसञ्चाराय तत्त्वचतुष्टयमुपदिश्यते। अत्र समेषां दृष्टिः नूनं निपतेत्। क्रमशः यथा -

१. परम्परामीमांसा प्रमेयमीमांसा प्रमाणमीमांसा पुरुषार्थमीमांसा च अकपटेन मनसा कर्तव्या।



२. सामयिकसमस्यापरिहारस्य मानकं निश्चित्य तदनुरूपपाठ्यक्रमनिर्माणं स्वाध्यायसामग्री-निर्माणं च करणीयम्।

३. लोकोपयोगीनि अर्थात् भारतीयसमाजोपयोगीनि शोधकार्याणि करणीयानि। सुभुक्तमन्नं यथा उदरं प्रविश्य रुधिररूपेण परिणमते तथैव आस्माकीनं शोधकार्यं लोकहितकारिरूपेण परिणमेत। तदैव शोधकार्यं सफलं मन्यते जगत्।

४. आधुनिककाले आधुनिकविद्यानिवहेषु च पारम्परिकविद्यायाः प्रभावः पूर्णशः भवेत्। तथा संस्कृतज्ञैः कार्यं करणीयम्।




सभायाम् उपस्थितः दिल्लीविश्वविद्यालयस्य तरुणाचार्यः आचार्यरञ्जनकुमारत्रिपाठीवर्यः संस्कृतहितरक्षणरतोऽस्ति। संस्कृतसेवार्थं कटिबद्धाय अतिथये स्वस्ति। संस्कृतविभागस्य (Department of Sanskrit) स्थाने संस्कृताध्ययनकेन्द्रम् (School of Sanskrit and Indian Studies) इत्येव भवतु।

सर्वेषां शुभं चापि भवतु।

**संयोजकः** – डॉ. डी. दयानाथः

**सुलेखः**– आचार्यः गणेशतिम्मणपण्डितः

**पुटविन्यासः** – श्रीशसमीरः के एस्